# केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन संस्थापितः भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः)

गुरुवायूर्-परिसरः, पुरनाट्टुकरा, तृश्शूर्, केरलम्-680551

शिक्षाशास्त्रविद्याशाखा 2025-2026

## गुरुपूर्णिमामहोत्सवः 2025-26

10-07-2025

**कार्यक्रमविवरणम्**

भारतीयसंस्कृतौ अस्यां गुरुपरम्परां सम्यगाहृत्य जीवनं फलप्रसूतीमगादिति विचिन्त्य प्रतिवर्षं केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर्-परिसरे व्यासपूर्णिमाचरणं क्रियते। आधुनिके युगेऽसेमिन् छात्राणां कृते गुरूणां महत्त्वं ज्ञापयितुं, जीवने तेषां मार्गदर्शनस्यावश्यकतां अवगन्तुं च विशिष्टानुभवसम्पादनमिति आचरणस्यास्य प्रमुखमुद्देशेयम्। क्रमेऽस्मिन् स्वस्ति श्री शालिवाहनशकवर्षे (१९५७), कोल्लं शकवर्षे (१२००), विश्वावसु नाम संवत्सरे, आषाढमासे, शुक्लपक्षे, पूर्णिमायां, पूर्वाषाढनक्षत्रे, ऐन्द्रयोगे, भद्राकरणे, गुरुवासरे व्यासपूर्णिमा समागता इति हेतोः **गुरुपूर्णिमामहोत्सवः** आयोजनीय इति गुरुवायूर्-परिसरस्य निदेशकवर्याणाम् आचार्याणां के.के.षैन् महोदयानां निर्देशानुगुणं कार्यक्रमो अयं 10.07.2025 तमे दिनाङ्के आचरणीय इत्यतः कार्यालयपक्षतः एका समितिः घटिता। समित्यामस्यां शिक्षाशास्त्रविद्याशाखायाः प्राध्यापकः प्रो. के. के. हर्षकुमार् महोदयः समन्वयकरूपेण, प्राध्यापिका डा. श्रुति के. बि संयोजिकारूपेण, डा.वि.फणिप्रसादः तथा श्रीमती ग्रीष्मा एम् एस् च सहसंयोजकरूपेण, एवं चान्ये शिक्षकाः सदस्यरूपेण संसूचिताः वर्तन्ते। प्रदत्तनिर्देशानुगुणं समित्या कार्यक्रमोयं 10.07.2025 तमे दिनाङ्के आचरितः। पुण्ये दिनेऽस्मिन् केरल-संस्कृत-अकादमी अध्यक्षः तथा केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्राचार्यचरश्च प्रो.के.टि.माधवन् महोदयः गुरुपूजनार्थम् आमन्त्रितः।

दीपप्रज्वालनेन गुरुपूजनकार्यक्रमस्य आरम्भः कृतः। सभायाः अस्याः सञ्चालनं शिक्षाशास्त्रविद्याशाखायाः आचार्यः डा. वि.फणिप्रसादमहोदयः अकरोत्। केरल-संस्कृत-अकादमी अध्यक्षः तथा केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्राचार्यचरश्च प्रो. के. टि माधवन् महोदयः, परिसरनिदेशकाः प्रो.के.के.षैन् महोदयः, परिसरस्य उपनिदेशिका प्रो. आर्.प्रतिभामहोदया, कुलपतिपुरस्कारेण सम्मानितः प्रो. क.ई.मधुसूदनन् महोदयः, व्यासोपाध्यायपुरस्कारेण सम्मानितः डा. बि. वि. एल्. लक्ष्मीनारायणमहोदयः, छात्रकल्याणपरिषदः अध्यक्षः प्रो. नारायणनन् महोदयः, कार्यक्रमसमन्वयकः प्रो.के.के.हर्षकुमार् महोदयश्च मञ्चमलङ्कृतवन्तः। आरम्भे शिक्षाशास्त्रिद्वितीयवर्षीयः छात्रः सत्यप्रकाश तिवारी शिष्टाचाररीत्या वैदिकमङ्गलाचरणमकरोत्। शिक्षाशास्त्रिद्वितीयवर्षीयः छात्रः सन्नथ् कुमार् मिश्रः लौकिकमङ्गलाचरणं कृतवान्। शिक्षाशास्त्रविद्याशाखायाः शिक्षिका डा. श्रुती. के. बि समागतानां सर्वेषां कृते स्ववचोभिः स्वागतं कृतवती। पुस्तक-लाङ्कवप्रदानेन माधवाचार्याणां सम्माननं तथा सर्वे परिसरीयाः अध्यापकाः छात्राश्च गुरुपादुकाभ्यां पुष्पार्पणेन गुरुपूजने भागभाजाः जातः। गुरूणां महत्त्वम्, सामाजिकोत्तरदायित्वादि विषये गुरूपदेशः आचार्येण प्रदत्तः। परिसरनिदेशकाः प्रो. के. के. षैन् महोदयाः अध्यक्षरूपेण समुपस्थाय स्वीयोपदेशवचसा छात्रान् उद्बोधितवन्तः। सन्दर्भेऽस्मिन् कुलपतिपुरस्कारेण अलङ्कृतस्य प्रो. क.ई.मधुसूदनन् महोदयस्य, व्यासोपाध्यायपुरस्कारेण अलङ्कृतस्य डा. बि. वि. एल्. लक्ष्मीनारायणमहोदयस्य च सम्माननं परिसरपक्षतः कृतम्। परिसरस्य उपनिदेशिका प्रो. आर्. प्रतिभामहोदया, कुलपतिपुरस्कारेण सम्मानितः प्रो. क.ई.मधुसूदनन् महोदयः, व्यासोपाध्यायपुरस्कारेण सम्मानितः डा. बि. वि. एल्. लक्ष्मीनारायणमहोदयः, छात्रकल्याणपरिषदः अध्यक्षः प्रो. नारायणनन् महोदयः, कार्यक्रमसमन्वयकः प्रो.के.के.हर्षकुमार् महोदयश्च अनुग्रहणभाषणेन छात्रान् प्रेरितवन्तः। अन्ये विभागीयाध्यापकाः छात्रान् आशंसाभाषणेन अनुगृहीतवन्तः। छात्राणां विभिन्नसांस्कृतिककार्यक्रमेण कार्यक्रमः अयं सुसम्पन्नः जातः। अन्तिमे शिक्षाशास्त्रविद्याशाखायाः शिक्षकः डा. एम् श्रीधरराजन् महोदयः समागतानां सर्वेषां कृते

स्ववचसा धन्यवादान् समर्पितवान्। सत्रस्यान्तिमे शान्तिमन्त्रोच्चारणेन कार्यक्रमः अयं समापितः।

**<u>कार्यक्रमसमितिः-</u>**



CENTRAL SANSKRIT UNIVERSITY
GURUVAYOOR CAMPUS
PURANATTUKARA, THIRISSUR

OFFICE ORDER No: 84 Date: 02-07-2025

A committee constituted comprising the following members for the programme **"Guru Poornima"** celebrated on **10th July 2025** at **03:00 PM** in the CSU Guruvayoor Campus, under School of Pedagogy.

Members

| | | | |
|---|---|---|---|
| 1. | **Prof.K.K Harshakumar** | - | **Convener** |
| 2. | Dr.D.Venugopala Rao, Assistant Professor | - | Member |
| 3. | Dr. B Venkata Lakshmi Narayana ,Assistant Professor | - | Member |
| 4. | Dr.Shyam Raj.C, Assistant Professor | - | Member |
| 5. | Dr.B.Naresh Kumar Naik, Assistant Professor | - | Member |
| 6. | **Dr. Sruthy K.B Assistant Professor** | - | **Coordinator** |
| 7. | Dr.M.Sridhar Rajan, Assistant Professor (Guest) | - | Member |
| 8. | **Dr.V. Pani Prasad Assistant Professor (Guest)** | - | **Sub - Coordinator** |
| 9. | **Ms. Greeshma. M.SAssistant Professor (Guest)** | - | **Sub - Coordinator** |

DIRECTOR

Copy to: 1. Concerned persons
2. S.S. File



# <u>कार्यक्रमाः</u>

| | |
|---|---|
| दीपप्रज्वालनम् | मञ्चस्थैः विद्वद्भिः |
| वैदिकमङ्गलाचरणम् | सत्यप्रकाश तिवारी (शिक्षाशास्त्री द्वितीयवर्षीयः) |
| लौकिकमङ्गलाचरणम् | सन्नथ् कुमार् मिश्र (शिक्षाशास्त्री द्वितीयवर्षीयः) |
| कुलगीतम् | |
| स्वागतभाषणम् | डा. श्रुती के बि |
| गुरुपूजनम् –<br>**प्रो.के.टि.माधवन् महोदयः**<br>(केरल-संस्कृत-अकादमी अध्यक्षः तथा केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्राचार्यचरश्च) | |
| गुरूपदेशः - प्रो.के.टि.माधवन् महोदयः | |
| पुरस्कृतानां गुरूणां सम्माननं मार्गदर्शनञ्च | ▪ प्रो.मधुसूदनन् महोदयः (कुलपतिपुरस्कारेण सम्मानितः)<br>▪ डा. बि वि एल् लक्ष्मीनारायणमहोदयः (व्यासोपाध्यायपुरस्कारेण सम्मानितः) |
| अनुग्रहभाषणम् | ▪ प्रो.आर्.प्रतिभामहोदया,उपनिदेशिका<br>▪ प्रो. क.ई.मधुसूदनन् महोदयः<br>▪ डा. बि. वि.लक्ष्मीनारायणमहोदयः<br>▪ प्रो. इ.आर्. नारायणनन् महोदयः छात्रकल्याणपरिषदः अध्यक्षः<br>▪ प्रो.के.के.हर्षकुमार् महोदयः, कार्यक्रमसमन्वयकः |
| आशंसाभाषणम् | प्रत्येकं विभागपक्षतः अध्यापकाः |
| अध्यक्षभाषणम् | प्रो. के. के. षैन् महोदयाः, निदेशकः के.से.वि गुरुवायूर् परिसरः |
| छात्राणां सांस्कृतिककार्यक्रमाः | |
| कृतज्ञताज्ञापनम् | डा.एम्. श्रीधरराजन् |
| शान्तिमन्त्रः | |
| सभासञ्चालनम् | डा. वि. फणिप्रसादः |

# गुरुपूर्णिमामहोत्सवः – स्मृतिचित्राणि





















संसदः अधिनियमेन स्थापितः






केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
गुरुवायूर परिसरः पुरनाट्टुकरा, तृश्शूर, केरलम् - ६८० ५५१
गुरुपूर्णिमामहोत्सवः
A++
NAAC






































नियमेन स्थापितः


द्रीयसंस्कृतविश्वविद्यालयः
NAAC


केन्द्रीयसंस्कृतविश्वविद्यालयः
NAAC












NAAC
केरलम् - ६८० ५५१


संसदः
गुरुवायूर् परिसरः



केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः) भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः
गुरुवायूर् परिसरः पुरनाट्टुकरा, तृश्शूर्, केरलम् - ६८० ५५१
गुरुपूर्णिमामहोत्सवः



















24/07/25